# 7.1.1 QNM SUPPORTING DOCUMENTS


## List of Programmes

| Year | Title of the programme | Date and Duration (from-to) |
|---|---|---|
| वर्षम् | कार्यक्रमाणां शीर्षकम् | अवधिः (दिनाङ्कतः ----- पर्यन्तम्) |
| 2015-16 | Women Empowerment Program | 01-08-2015 TO 14-08-2015 |
| 2015-16 | Beti Bachao Beti Padhao Rally | 22-01-2016 |
| 2016-17 | Lecture on Women Education and Women Rights | 10-08-2016 |
| 2016-17 | Beti Bachao Beti Padhao Rally | 20-01-2017 |
| 2017-18 | Women Awareness Camp Program | 16-09-2017 |
| 2017-18 | Lecture on Women Rights | 15-01-2018 |
| 2018-19 | Lecture on Women Empowerment | 18-08-2018 |
| 2018-19 | Beti Bachao Beti Padhao Rally | 24-01-2019 |
| 2019-20 | Problem Solving Competition on "Beti Bachao Beti Padhao" | 26-09-2019 |
| 2019-20 | Women Skill Development Program | 31-01-2020 |

# Women Empowerment Program

## 01-08-2015 to 14-08-2015

The Women Empowerment Program was organized by the Government of Gujarat from 01-08-2015 to 14-08-2015. A lecture was delievered by the officer of Women Security Assistant (Helpline-181) under the Women Security Day on 1st August 2015. On 7th August 2015 Mrs. Kalpanaben Trivedi and Dr. K. P. Patel Sir gave a lecture on Women's Fitness Day and Dr. J. D. Mungara also delivered lecture on 14-08-2015 on Yoga and Meditation. 130 students and 10 teachers were participated in this program.



॥ गुजरातसर्वकारायोजितः महिलासशक्तिकरण-पाक्षिक-कार्यक्रमः ॥

गुजरातसर्वकारद्वारा महिलासशक्तीकरणपक्षस्य आयोजनं १-८-२०१५ तः १४-८-२०१५ दिनाङ्कं यावत् समभवत्। तस्मिन् विविधकार्यक्रमाः समायोजिताः। तस्यानुसन्धाने १-८-२०१५ तमदिनाङ्के ''महिला-सुरक्षा-दिनस्य''आयोजनमभवत्। अस्मिन् ''महिलासुरक्षासहाय'' (हेल्पलाइन-१८१) इति प्रकल्पस्य अधिकारिण्यः भगिन्यः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रान् उद्बोधितवत्यः। विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षाः प्रो.देवेन्द्रनाथपाण्डेयमहोदयः, प्रो.अर्चनादुबेमहाभागा, प्रो.विनोदकुमारझामहोदयः कार्यक्रमे स्वीयोपस्थित्या सह मार्गदर्शनं कृतवन्तः। सम्पूर्णकार्यक्रमस्य सञ्चालनं डॉ.रमेशचन्द्रशुक्लमहोदयेन कृतम्।

तस्मिन्नेव पाक्षिक-कार्यक्रमे ७-८-२०१५ तमदिनाङ्के ''महिलाकारकीर्दीदिवसस्य'' आयोजनम् अभवत्। तस्मिन् कार्यक्रमे अतिरिक्तजिलाधीशः एवं उपदण्डाधिकारी श्रीमतीकल्पनाबेनत्रिवेदी तथा उपसमाहर्ता श्रीदर्शनाबेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रान् उद्बोधितवत्यौ। कार्यक्रमस्य अध्यक्षत्वेन कुलसचिववर्याः डॉ. दशरथजादवमहोदयाः मार्गदर्शनं दत्तवन्तः। विश्वविद्यालयस्य पुरतः मत्स्यपालनमहाविद्यालयस्य १३० छात्राः, १० अध्यापकाश्च कार्यक्रमे उपस्थिताः आसन्। सम्पूर्णस्य कार्यक्रमस्य सञ्चालनं डॉ.अमृतलालभोगायता अकरोत्।

१४-८-२०१५ तमे दिनाङ्के अस्य पक्षस्य अन्तिमदिवसः ''महिलाशारीरिकसौष्ठवदिवस''त्वेन आचरितः। अस्मिन् कार्यक्रमे जनपदशिक्षणाधिकारी श्रीके.पी.पटेलमहोदयः अध्यक्षत्वेन उपस्थाय मार्गदर्शनं व्याख्यानञ्चाकरोत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः प्रो.देवेन्द्रनाथपाण्डेयः तथा साहित्यविभागाध्यक्षा प्रो.अर्चनादुबे अतिथिरूपेणोपस्थाय मार्गदर्शनमकुरुताम्। अत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेरावल-सर्वकारिविद्यालयस्य च विद्यार्थिन्यः, वेरावलस्य शिक्षिकाः अन्याश्च भगिन्यः उपस्थितवत्यः। कार्यक्रमेऽस्मिन् योगविभागस्य छात्राः योगप्रदर्शनमकुर्वन्। योगविषये मार्गदर्शनं फाल्गुनीपृच्छक कृतवती। शारीरिकसौष्ठवविषये ''सेल्फ-मेडिटेशन'' विषये च प्रा.जयेश डी.मुंगरा व्याख्यानं दत्त्वा कार्यक्रमस्य संयोजनम् अकरोत्। कार्यक्रमस्य सफलं सञ्चालनं डॉ. अमृतलालभोगायताद्वारा सञ्जातम्। विश्वविद्यालयपक्षतः अस्य कार्यक्रमस्य संयोजनं डॉ.ललितपटेलः कृतवान्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 12, Page no. 05)



# Beti Bachao Beti Padhao Rally 22-01-2016

The Government of Gujarat organized Beti Bachao Beti Padhao program to bring awareness in the society. Under this program, a Rally was held by Shri Somnath Sanskrit University on 22nd January 2016 from the University Campus to Tower Chowk.





## Lecture on Women Education and Women Right 10-08-2016

On 10th August 2016, Shri Somnath Sanskrit University organized a lecture on Women Education and Women Rights.






# Beti Bachao,Beti Padhao Rally 20-01-2017

Under the Beti Bachao Beti Padhao program organized by the Government of Gujarat, a Beti Bachao Beti Padhao Rally was held by Shri Somnath Sanskrit University on 20th January 2017 from the University Campus to Tower Chowk.



# Women Awareness Camp Program 16-09-2017

A Women Awareness Camp was organized by Shri Somnath Sanskrit University on 16-9-2017 in collaboration with Gujarat State Women Commission in the Community Hall of Veraval Municipality. President of Gujarat State Women Commission, Smt. Leelaben Ankolia presided over the camp. Hon'ble Vice-Chancellor of University, Prof. Ark Nath Chaudhary inaugurated the camp. 500 Girls of different colleges were participated in this camp

## महिलाजागृतिशिबिरकार्यक्रमवृत्तम्

१६-०९-२०१७ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन गुजरातराज्यमहिला-आयोगस्य सहयोगेन वेरावलपाटणसंयुक्तनगरपालिकायाः कम्युनिटी होल इत्यत्र महिलाजागृतिशिबिरं समायोजितम् अस्मिञ्छिबिरे गुजरातराज्यमहिला-आयोगस्य अध्यक्षा श्रीमती लीलाबेन-अंकोलिया आध्यक्ष्यं निरूढवती। अस्य शिबिरस्य उद्घाटनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिभिः श्रीमद्भिरर्कनाथचौधरिवर्यैः विहितम् । अथात्र अतिथिविशेषत्वेन गुजरातराज्यसर्वकारस्य राज्यमन्त्री श्रीजशाभाईबारडमहोदयः, गुजरातराज्यमहिला-आयोगस्य सचिवपदवाच्या श्रीमती वीणावबेन-पटेलमहोदया, तथैव वेरावलपाटणसंयुक्तनगरपालिकाया अध्यक्षः श्रीजगदीशभाईफोफण्डीमहोदयश्च उपातिष्ठन्त। परम्परामनुसृत्य दीपप्रज्वालनवैदिकस्तुतिपुरस्सरम् अस्य कार्यक्रमस्य समारम्भः समजायत। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः श्रीमहेन्द्रकुमारदवेवर्यः समागतानां पञ्चमाधितिष्ठितानां समेषाम् अतिथीनां सकुसुमस्तबकं शाब्दिकं स्वागतमकार्षीत् । इमे च महानुभावाः वेरावलनगरस्य उपसहस्रं विद्यार्थिनः उदबूबुधन् । अन्ते अस्य कार्यक्रमस्य संयोजिका प्रो. अर्चना दुबे महोदया सधन्यवादवचः कार्यक्रमममुं उपसंहृतवती । इत्थमयं कार्यक्रमः सभोजनं समाप्तिमगात्।



Report Source: **SOMJYOTI**- University Newsletter (Issue: 16, Page no. 05)


ગુજરાત રાજ્ય મહિલા આયોગ, ગાંધીનગર તથા
શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી, વેરાવળ ના
સંયુક્ત ઉપક્રમે એક દિવસીય
કાયદાકીય જાગૃતિ શિબિર
તારીખ : ૧૬/૯/૨૦૧૭, શનિવાર
સ્થળ : કોમ્યુનિટિ હોલ, બિહારી



# Lecture on Women Rights 15-01-2018

Shri Somnath Sanskrit University organized a lecture on 15th January 2018 on Women Rights. The Lecture was delivered by Dr. Uma Maheshwari.



# Lecture on Women Empowerment 18-08-2018

Shri Somnath Sanskrit University organized a lecture on 18th August 2018 on Women Empowerment.






# Beti Bachao, Beti Padhao Rally 24-01-2019

A Rally was held by Shri Somnath Sanskrit University on 24th January 2019 from the University Campus to Tower Chowk under the Beti Bachao Beti Padhao program organized by the Government of Gujarat. This program successfully developed a positive attitude towards women in the society.





## Problem Solving Competition (समस्यापूर्ति स्पर्धा) 26-09-2019

## Subject – “Beti Bachao, Beti Padhao”

Shri Somnath Sanskrit University organized a Problem Solving Competition on the topic of “Beti Bachao Beti Padhao”. In the competition many students Completed the Sanskrit Shloks and expressed their love and respect towards Women and Girls.



### छात्रप्रातिभवैभवम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रयोदशे युवमहोत्सवे “**कन्यका पाल्यतां कन्यका पाठ्यताम्**” इति विषये समस्यापूर्तिस्पर्धायां विविधच्छात्रैः रचितानि पद्यानि –

**(१) – कन्यारक्षणाष्टकम्**

विश्वसम्पोषिका विश्वसंवर्धिका शक्तिरूपा शिवा विश्वमूलाऽमला।
देवरूपा दयामूर्तिरूपा सदा कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
साम्प्रते तान्त्रिके जागृते शैक्षिके सर्वतन्त्रे स्वतन्त्रे नभश्चुम्बिते।
वैश्विके त्यक्तकुश्रद्धशिक्षायुगे कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥
कल्पना चावला दीपिका सायना पी.वी.सिन्धुः स्मृतिर्मेरिकोमेन्दिरा।
भारता दृश्यतां भारता गृह्यतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥३॥
कार्यसम्मन्त्रिणी या स्वयंसेविका भोजने मातृका स्वप्नरम्भा मता।
धर्मसञ्चारिणी गेहसञ्चालिका कन्यका पाल्यतां कन्यका पाठ्यताम्॥४॥
मानवश्चन्द्रगो भौमभूमिं गतः, वोयजर्थानतः सूर्यवृत्तं जितम्।
तादृशे संयुगे हे जना! जाग्रतु कन्यका पाल्यतां कन्यका पाठ्यताम्॥५॥
सर्वकारोऽपि 'बेटी बचाओ' सदा योजनां लक्षवित्तैः सुसञ्चाल्यते।
मोदिवाक्यं शिवं सख! आगम्यतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥६॥
पौरुषे प्राकृते भेदबोधो वृथा द्वे समाने सदा वेदवाक्यैः स्फुटम्।
तत् 'समानी व आकूति'-रेतद्यथा कन्यका पाल्यतां कन्यका पाठ्यताम्॥७॥
सुहृदागम्यतां भेदधीस्त्यज्यतां कन्यका सर्वतन्त्रेति सम्मन्यताम्।
उच्चतो गर्ज्यतां नादतो गर्ज्यतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥८॥

***(त्रयोदशे युवमहोत्सवे प्रथमस्थानेनसभाजिता इयं रचना)***

रचयिता -



**भट्टः सौरभकुमार जगदीशभाई,**
श्रीवरतन्तुसंस्कृतमहाविद्यालयः,
सोला (अहमदाबाद)

**(२) - कन्यका पाल्यतां कन्यका पाठ्यताम्**

सद्म वृन्दावनं यत्पदाम्भोरुहपातसंपावितं कारितं धारितम्।
देवता यापरा शारदैवापरा कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
कृत्स्नमुर्वीतलं वा यया पालितं शारदारूपया भूरिशः पाठितम्।
हन्त! तत्रापि निम्नोक्तमापठ्यते कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥
यन्मुखान्निर्गता काकली शोभना सञ्चरन्ती गृहे पुण्यमातन्वती।
हर्षसंपूरितं या करोत्यन्तरं कन्यका पाल्यतां कन्यका पाठ्यताम्॥३॥
हे पितः! स्थीयतां साकमेह्येहि मे क्रीडितं पश्य ते सुता कथं क्रीडति।
इत्थमस्याः वचो मत्कृते जीवनं कन्यका पाल्यतां कन्यका पाठ्यताम्॥४॥
प्राणदात्री च या मातृरूपात्मका प्राणधर्त्री च या तत्स्वरूपा पुनः।
हन्त! तस्या दशा कीदृशी जायते? कन्यका पाल्यतां कन्यका पाठ्यताम्॥५॥
कन्यका काङ्क्ष्यतां कन्यका जायतां कन्यकाशोभितं भूतलं नम्यताम्।
कन्यकाशक्तिरुज्जृम्भतां भूतले कन्यका पाल्यतां कन्यका पाठ्यताम्॥६॥
भो जनाः किं भवद्भिः सुधा काङ्क्ष्यते? गेहके स्वर्गसम्पन्मुदा भाव्यते?
तर्हि मे सद्वचः श्रूयतां तथ्यजं कन्यका पाल्यतां कन्यका पाठ्यताम्॥७॥
हन्त! यस्या दशामीदृशीं वीक्ष्य रे लेखदक्षापि मे लेखिनी कम्पते।
नाधिकं लिख्यते निम्नमाम्रेड्यते 'कन्यका पाल्यतां कन्यका पाठ्यताम्'॥८॥
धन्यधन्यं गृहं यद्गृहे कन्यका पुण्यपुण्यं जगत् कन्यकाशोभितम्।
मान्यमानो जनः कन्यकापत्यवान् कन्यका पाल्यतां कन्यका पाठ्यताम्॥९॥

***(त्रयोदशे युवमहोत्सवे द्वितीयस्थानेन सभाजिता इयं रचना)***

रचयिता –



**ठाकरः राजेशकुमार गोविन्दभाई,**
श्रीभागवतविद्यापीठट्रस्ट-शिक्षाशास्त्रि-
महाविद्यालयः, सोला (अहमदाबाद)

**(३) कन्यका पाल्यतां कन्यका पाठ्यताम्**

(विषयमण्डनप्रस्तुतिः)

यो महावेदनातः प्रसूतः सुतः पोषितः दुष्करैः कर्मभिः पाठितः। आत्मनोऽद्यास्ति भार्यानिदेशे रतः कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
वित्तवारैरसौ वैद्यकः कारितो लोकपीडारतोऽयं हि वित्तस्पृहः। रुग्णमाता सकृत्तेन नो दृश्यते कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥
सेवते पूर्वमेषा पितुः मन्दिरं सेवते सा च पत्युः पुनः मन्दिरम्। तां द्वयोः पितृपत्यालयोः देवतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥३॥

(प्राप्तविषयखण्डनम्)

या हि पित्रा सदा लालिता पालिता पूरिता सर्वदुष्परणीयाः स्पृहाः।
प्रेममार्गा त्यजत्यद्य पित्रोर्गृहं कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
या च मात्रा हि बाल्यात् सदा शिक्षिता रक्षिता दूषणात् भूषणैर्मण्डिता।
सा सखीमध्यगा मातृतो लज्जते कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥

***(त्रयोदशे युवमहोत्सवे तृतीयस्थानेन सभाजिता इयं रचना)***



रचयिता – **जोशी सहदेव प्रवीणचन्द्रः**, श्रीभागवतविद्यापीठट्रस्टसञ्चालितशिक्षाशास्त्रिमहाविद्यालयः, सोला (अहमदाबाद)

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 18)

# Women Skill Development Program 31-01-2020

A Women Skill Development Program was organized on 31st January 2020 in University Campus. In this program women learnt how to create various types of items by using waste materials.







Vivo V11Pro
AI Dual Camera
2020.01.31 12:22